# 2014

## M.A. Part - I Examination

## SANSKRIT

### Paper IV

Time : 4 Hours

Full Marks : 100

*The figures in the margin indicate Full Marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**First Half**

**(Marks - 60)**

**Unit - I**

1. मेघदूतं गीतिकाव्यमिति मतं समालोच्यताम् 14

अथवा

उज्जयिन्याः शोभाम् उपवर्ण्यताम् ।

2. जातं वशे भुवनविदिते पुष्करावर्तकानां 6

जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ।

तेनार्थित्वं त्वयि विधिवशाद् दुरबन्धुर्गतोऽहं

याच्ञा मोघा वरमधिगुणे नाधमे लव्धकमा ।।

अथवा

मन्दाकिन्याः सलिलशिशिरैः सेव्यमानामरुद्भि-

र्मन्दाराणामनुतररुहां छायया वारितोष्णाः ।

अन्वेष्टव्यैः कनकसिकता मुष्टिनिक्षेपगूढैः

संक्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः ।।

3. हर्षचरितपञ्चमोच्छ्वासस्य वैशिष्ट्यं प्रतिपाद्यताम्। 14

अथवा

गद्यकाव्यनिबन्धने बाणस्य कीदृशी कवित्व - प्रशस्तिः तद् विचार्यताम्।

4. अधोलिखितयोः श्लोकयोः कस्यचिदेकस्य व्याख्या कार्या- 6

a) पातयति महापुरुषान्सममेव बहूननादरेणैव।
परिवर्तमानः एकः कालः शैलानिवानन्तः।।

अथवा

b) आसीच्चास्य चेतसि - लोके हि लोहेभ्यः कठिनतराः खलु स्नेहमया बन्धनपाशाः यदाकृष्टास्तिर्यञ्चोऽप्येवमाचरन्ति इति।

5. दमयन्त्याः चारित्रिकं वैशिष्ट्यं प्रतिपाद्यताम्। 14

अथवा

नवमसर्गस्य कथासारः प्रस्तूयताम्।

6. अधोनिर्दिष्टयोः श्लोकयोः कस्यचिदेकस्य व्याख्या कार्या- 6

a) अदृश्यमाना क्वचिदीक्षिता क्वचिन्ममाऽनुयोगे भवतः सरस्वती।
क्वचित्प्रकाशां क्वचिदस्फुराऽर्णसं सरस्वतीं जेतुमनाः सरस्वतीम्।।

b) अये! ममोदासितमेव जिह्वया द्वयेऽपि तस्मिन्नति प्रयोजने।
गरौ गिरः पल्लवनाऽर्थलाघवे मितं च सारं च वचो हि वाग्मिता।।





**Second Half**

**(Marks - 40)**

1. मृच्छकटिकमिति प्रकरणानुसारं चारुदत्तस्य चरितमुपस्थापयत। 12

अथवा

मृच्छकटिके वर्णितं सामाजिकचित्रम् उपस्थाप्यताम्। 12

2. कस्यचिदेकस्य श्लोकस्य संस्कृतभाषया व्याख्या कार्या। 8

a) शून्यमपुत्रस्य गृहं चिरशून्यं नास्ति यस्य सन्मित्रम्।
मूर्खस्य दिशः शून्याः सर्वं शून्यं दरिद्रस्य।।

b) द्रव्यं लब्धं द्यूतेनैव दारा मित्रं द्यूतेनैव।
दत्तं मुक्तं द्यूतेनैव सर्वं नष्टं द्यूतेनैव।।

3. मुद्राराक्षसनाटकस्य नामकरणं यथार्थं न वेति विचार्यताम्। 12

अथवा

मुद्राराक्षसनाटकानुसारं राक्षसस्य चरितमुपस्थापयत। 12

4. कस्यचिदेकस्य श्लोकस्य संस्कृतभाषया व्याख्या कार्या- 8

a) स्वयमावृत्य भुञ्जाना बलिनोऽपि स्वभावतः।
गजेन्द्राश्च नरेन्द्राश्च प्रायः सीदन्ति दुःखिताः।।

b) सुलभेष्वर्थलाभेषु परसंवेदने जनः।
कः इदं दुष्करं कुर्यादिदानीं शिविना विना।।

---